In Public domain. Digitization Muthulakshmi Research Academy

(2)

अनुप्रास्ताविकम्

दीपिकासहितस्य योगिनीहृदयस्य द्वितीये संस्करणे श्रद्धेयचरणानां म० म० श्रीगोपीनाथकविराजमहोदयानां निदेशमनुसृत्य आनन्दाश्रमसंस्कृतग्रन्थमालायां प्रकाशितचरस्य भास्कररायरचितस्य नित्याषोडशिकार्णवव्याख्यानस्य सेतुबन्धाख्यस्यापि योगिनीहृदयव्याख्यानभूतोंऽशः समावेशितः षष्ठसप्तमाष्टमविश्रामात्मकः, येन हि दीपिकासेतुबन्धयोस्तौलनिकसमीक्षायां सौकर्यं संपद्येतानुशीलनरुचीनाम् ।

अत्रेदमवधेयम्—दीपिकाकारामृतानन्दनाथयोगिनः सेतुबन्धकारभास्कररायस्य चावस्थितिकालयोर्महदन्तरं विद्यते । अपि च, योगिनीहृदयस्य हादिविद्यापरकमेव व्याख्यानं प्राचीनटीकाकाराणां संमतम्, भास्कररायेण तु कादिमत(तन्त्रराज)-ज्ञानार्णवादिवदस्यापि तन्त्रस्य कादिविद्यापरकत्वमेव प्रतिपादितम् । अतोऽनयोर्व्याख्यानयोर्विषये गुरुचरणैर्यत् प्रथमसंस्करणभूमिकायामुक्तं तद्विशेषतोऽवधातव्यं मनीषिभिः ।

योगिनीहृदयवामकेश्वरयोर्भिन्नत्वम्

"तद्वामकेश्वरे तन्त्रे सूचितार्थान् परापरान् । व्यक्तीकर्तुं प्रयतते योगिनीहृदयेऽधुना ॥" (तत्रैव, पृ० २) इति मङ्गलाचरणस्थपञ्चमश्लोकतः, "वामकेश्वरतन्त्रे चतुःशतीशास्त्रे" (तत्रैव, पृ० ३) इति वामकेश्वरपदव्याख्यानतः, "वामकेश्वरशास्त्र एवासामुद्धारः" (तत्रैव, पृ० ९१) इत्युक्तिश्च दीपिकाकारस्यामृतानन्दयोगिनो वामकेश्वरतन्त्रतो भिन्नत्वं योगिनीहृदयस्याभिप्रेतम् । अत्र चतुःशतीशास्त्रनाम्ना नित्याषोडशिकार्णवो ग्रन्थकारस्याभिप्रेतः । तत्र हि श्लोकानां चतुःशती विद्यते । योगिनीहृदयेऽपि तावन्त एव श्लोकाः सन्ति । सेतुबन्धकारो भास्कररायोऽत्र—"पूर्वोत्तरभागयोरैकशास्त्र्यम्" (तत्रैव, पृ० ३) इति प्रतिपादयन् पूर्वोत्तरभागौ 'पूर्वचतुःशती', 'उत्तरचतुःशती' इति बहुषु स्थलेषु पृथक् पृथग् निर्दिशन् नित्याषोडशिकार्णवनाम्ना तावेकग्रन्थत्वेन व्याख्याति । अपि च, नित्याषोडशिकार्णवव्याख्यानारम्भे प्रस्तावनायामित्थं प्रतिपादयति सः—

In Public domain. Digitization Muthulakshmi Research Academy

"तदिदं वामकेश्वरतन्त्रं पूर्वोत्तरचतुःशतीयुगलात्मकमेव मन्यन्ते, उपक्रमोपसंहारयोस्तन्त्रारम्भसमाप्तिचिह्नदर्शनात्। परन्तु तन्त्रसारे—"चक्रसंस्कारविधिर्वामकेश्वरतन्त्रोक्तः" इत्युक्तम्। स्तोत्राणि च कानिचिदेतत्तन्त्रनाम्नैवोपलभ्यन्ते। सौभाग्यरत्नाकरे लिखिता षट्शती, ललितार्चनचन्द्रिकादौ लिखितवचनान्यप्येतत्तन्त्रनाम्नैव सन्ति। तेषामष्टशत्यामदर्शनात् क निवेश इति चिन्त्यम्। अत एवास्वरसाद् ऋजुविमर्शिन्यामुक्तम्—

श्रीवामकेश्वरं नाम शास्त्रं तन्त्रं प्रकाशते।
मध्ये शास्त्रस्य तस्यास्ति नित्याषोडशिकार्णवः॥
तत्र च द्वे चतुःशत्यौ.....॥ इति।

मनोरमायां तु—"नित्यानां षोडशानां च नव तन्त्राणि कृत्स्नशः"[1] इति श्लोकव्याख्यावसरे नित्याषोडशिकार्णव-सुन्दरीहृदय[2]-वामकेश्वर-तन्त्राणि पृथग् गणितानि। परन्तु तद्योगिनीहृदय एव "वामकेश्वर-तन्त्रेऽस्मिन्नज्ञातार्थास्त्वनेकशः"[3] इति निर्देशस्वरसविरुद्धम्। पूर्वोत्तरचतुःशत्योरेकवाक्यता त्वविवादा, पूर्वोत्तरसमाख्याबलात्। पूर्वतन्त्रे कथितानां करशुद्ध्यादिन्यासानामुत्तरतन्त्रेऽकथनेन, तत्रोद्धृतायां मूर्तिविद्यायाः पूर्वतन्त्रेऽनुद्धारादिना च ज्ञापकेन परस्पर-साकाङ्क्षत्वाच्च"[4] इति।

सरस्वतीभवनपुस्तकालये ऋजुविमर्शिन्याः[5] शिवानन्दमुनिरचिताया नित्याषोडशिकार्णवव्याख्यायाः २४८१७ संख्याका अपूर्णा मातृका विद्यते। तत्रत्यः पाठ इत्थं विद्यते—

श्रीवामकेश्वरं नाम तन्त्रं तत्र प्रकाशितम्।
शिवेन संविदं देवीं लक्ष्यीकृत्य निजात्मिकाम्॥
मध्ये शास्त्रस्य तस्यास्ति नित्याषोडशिकार्णवः।

---

१. तन्त्रराज(कादिमत)तन्त्रम्, १।२
२. सुन्दरीहृदयं नित्याहृदयं योगिनीहृदयमित्यनर्थान्तरम्।
३. योगिनीहृदयम्, १।१
४. नित्याषोडशिकार्णवः, पृ० ७
५. ऋजुविमर्शिनीकार एष शिवानन्दमुनिर्महार्थमञ्जरीकारस्य गोरक्षनाथापरनामधेयमहेश्वरानन्दस्य परमगुरुरिति विभावनीयम्।

In Public domain. Digitization Muthulakshmi Research Academy

सूत्रैश्चतुःशतैर्युक्तः कश्चिद्भागो रसावहः ॥
स च पञ्चपटल्यात्मा कर्मपञ्चकभासकः ।[1] इति ।
(१–२ पत्रयोः)

अत्र सेतुबन्धोद्धृतः—"तत्र च द्वे चतुःशत्यौ" इत्यंशो न दृश्यते, प्रत्युत "सूत्रैश्चतुःशतैर्युक्तः", "स च पञ्चपटल्यात्मा" इत्यंशाभ्यां सेतुबन्धाशयविपरीतं चतुःशतश्लोकात्मकपञ्चपटलात्मक एव नित्याषोडशिकार्णव इति सिद्ध्यति । अथापि "मध्ये शास्त्रस्य तस्यास्ति नित्याषोडशिकार्णवः" इति वचनेन वामकेश्वरतन्त्रस्य मध्यभागे नित्याषोडशिकार्णव इत्यायाति । तेन नित्याषोडशिकार्णवस्य पूर्वापरभागयोर्वामकेश्वरतन्त्रस्य विस्तारः शिवानन्दमुनेरपि संमत इति वक्तुं शक्यते ।

"तदिदं वामकेश्वरतन्त्रं पूर्वोत्तरचतुःशतीयुगलात्मकमेव मन्यन्ते" इति सेतुबन्धसूचितं मतं केषां ग्रन्थकाराणामिति न परिज्ञायते ।

"नित्यानां षोडशानां च नव तन्त्राणि कृत्स्नशः" (१।२) इति तन्त्रराज-(कादिमत)श्लोकव्याख्यानावसरे मनोरमाकारेण सुभगानन्दनाथेन—"नवतन्त्राणि सुन्दरीहृदय-नित्याषोडशिकार्णव-चन्द्रज्ञान-मातृका-तन्त्र-सम्मोहनतन्त्र-वामकेश्वर-बहुरूपाष्टक - प्रस्तारचिन्तामणि - मेरुप्रस्ताराख्यानि वर्तन्ते" इत्युक्तम् । अत्र नित्याषोडशिकार्णवः सुन्दरीहृदयापरपर्यायं योगिनीहृदयं च पृथगेव परिगणिते । वामकेश्वरतन्त्रस्यापि पृथग् गणने किं बीजमिति न जानीमः । नित्यातन्त्रेषु प्रसिद्धतरौ श्रीक्रमसंहिताज्ञानार्णवावत्र न परिगणिता इत्यपि स्मरणीयं मनीषिभिः ।

एष च मनोरमाकारः सुभगानन्दनाथो भास्करारायेण सेतुबन्धे—"अतिप्राचीनैर्मनोरमाकारैः" (पृ० १७६) इत्येवं स्मृतः । तस्य समये सुन्दरीहृदयं (योगिनीहृदयं) वामकेश्वरतन्त्रं च पृथगेव गण्येते स्म । अयमेव चार्थः—"वामकेश्वरतन्त्रेऽस्मिन्नज्ञातार्थास्त्वनेकशः", "शृणु देवि महागुह्यं योगिनीहृदयं परम्" इत्याभ्यां योगिनीहृदयारम्भे स्थिताभ्यां प्रथमद्वितीयश्लोकाभ्यां प्रतीयते । अस्मिन् पूर्वोपदिष्टे वामकेश्वरतन्त्रेऽनेकेऽज्ञातार्थाः सन्ति, तानर्थानशेषेण वक्तुं योगिनीहृदयोपदेशः । 'पूर्वचतुःशती',

१. मद्रासराजकीयग्रन्थालयस्य विवरणात्मके सूचीपत्रे ऋजुविमर्शिन्या डी० ५६२२ संख्याकपुस्तकविवरणेऽप्येष एव पाठो दृश्यते ।

In Public domain. Digitization Muthulakshmi Research Academy

'उत्तरचतुःशती' इति समाख्ये अपि नवीने, अमृतानन्दमुनिना सर्वत्र चतुः-शतीपदेन नित्याषोडशिकार्णवस्यैव ग्रहणात्। तन्त्रालोकव्याख्यात्रा जयरथेन वामकेश्वरीमतनाम्ना पञ्चपटलात्मकस्य नित्याषोडशिकार्णवस्य विवरणं कृतम्। तेनापि ज्ञायते तदानीं नित्याषोडशिकार्णवो वामकेश्वरतन्त्रनाम्ना प्रथित आसीदिति।

अत्रैवं समाधातुं शक्यते—पूर्वं वामकेश्वरतन्त्रं योगिनीहृदयं च पृथगेव गण्येते स्म। ततः कालक्रमेण योगिनीहृदयस्य वामकेश्वरतन्त्राज्ञातार्थ-प्रकाशकत्वेनैकशास्त्र्यं पश्चात्तनैरङ्गीकृतम्। एवं च "वामकेश्वरतन्त्रं पूर्वोत्तरचतुःशतीयुगलात्कम्" इति मतमाविर्भूतम्। गच्छता कालेन [1]सौभाग्यरत्नाकरकारविद्यानन्दनाथगुरोर्ललितार्चनचन्द्रिकाकारस्य सच्चि-दानन्दनाथस्य समयेऽन्येऽप्यंशा अत्रत्या इत्यभिमताः। तत्परवर्तिना भास्करारायेण चैतदेवान्तिमं मतं स्वीकृतमिति।

दीपिकाकारपरिचयः

गुरुः पुण्यानन्दः

कामकलाविलासकारः पुण्यानन्दो दीपिकाकारस्यामृतानन्दयोगिनोः गुरुरासीदिति प्रतिपटलान्तं स्थितया दीपिकापुष्पिकया, "एतत् कामकला-विलासेऽप्यस्मद्गुरुभिः प्रपञ्चितम्" (तत्रैव, पृ० १९) इत्यमृतानन्दस्य स्वोक्त्या च स्फुटं प्रतीयते। अमृतानन्दगुरुणाऽन्येऽपि ग्रन्था रचिता आसन्। तत्त्वविमर्शिनीनामकस्य तद्रचितस्य ग्रन्थस्य "तत्त्वविमर्शिन्यामस्मद्गुरूक्त-रीत्या" (तत्रैव, पृ० २३५) इत्येवं दीपिकाकारेण निर्देशः कृतः। अनुष्टुप्-

---

१. सौभाग्यरत्नाकर-शिवार्चनचन्द्रिकाद्यनेकग्रन्थनिर्मात्रा श्रीनिवासभट्ट-परनामधेयेन विद्यानन्दनाथेन १६३० वैक्रमे वत्सरे सौभाग्यरत्नाकरो विरचित इति सरस्वतीभवनस्थस्य २५९४६संख्याकस्य सौभाग्य-रत्नाकरस्य पुष्पिकया ज्ञायते। तदित्थम्—

खवह्निरसशीतांशुसंख्ये विक्रमभूभुजः।
वत्सरे शुक्लपञ्चम्यां पुष्यमासस्य भास्करे॥
मकरस्थे सोमवारे प्रयागस्थेन धीमता।
श्रीविद्यानन्दनाथेन शिवयोः प्रियहेतवे॥
हिताय शिष्यवर्गाणां श्रीसौभाग्यपदादिकः।
रत्नाकरोऽयं रचितः साधकानां हितावहः॥ इति।

In Public domain. Digitization Muthulakshmi Research Academy

छन्दोनिबद्धः पद्धतिग्रन्थोऽयमिति प्रतीयते। अन्येऽपि दार्शनिकरहस्यप्रतिपादका बहवः श्लोका दीपिकाकारेण तत्र तत्र स्वगुरुनाम्नोद्धृताः, ये कामकलाविलासे नोपलभ्यन्ते। तत्रत्याः ७८,९३,१७५,१८५,१८८,१८९, १९५,२४९,३३७ पृष्ठस्थिताः श्लोकाः श्रीरङ्गम्नगरस्थवाणीविलासमुद्रणालयतो मुद्रिते चिद्विलासस्तवे दृश्यन्ते। तेनास्य स्तवस्य रचयिता पुण्यानन्द इति निश्चीयते। नटनानन्दकृतचिद्वल्लीव्याख्यासंवलितकामकलाविलासभूमिकायां जॉन-उडरफमहोदयेन पुण्यानन्दो योगिनीहृदयव्याख्यातृरूपेणापि स्मृतः। तत्र किं बीजमिति न जानीमः।

अन्ये ग्रन्थाः

दीपिकायामेव नैकश उद्धृतः सौभाग्यसुभगोदयोऽमृतानन्दस्य स्वतन्त्रो ग्रन्थ इति प्रतीयते। दीपिकायां तस्य विस्तृतान्युद्धरणानि प्रदत्तानि। षट्त्रिंशत्तत्त्वसंदोहनाम्ना काश्मीरसंस्कृतग्रन्थमालायां मुद्रितो ग्रन्थः सौभाग्यसुभगोदयस्यैवांशमात्रम्। दीपिकायां १२४-१२६ पृष्ठेषु षट्त्रिंशत्तत्त्वसंदोहस्थाः सर्वेऽपि श्लोकाः सौभाग्यसुभगोदयनाम्नोद्धृताः सन्ति। तत्रैव (पृ० १५०) सेतुबन्धेऽमृतानन्दस्य सौभाग्यसुधोदयनामा ग्रन्थ उद्धृतः। अड्यारपुस्तकालयेऽस्य ग्रन्थस्य मातृकाद्वयमुपलभ्यते। स एष ग्रन्थः सौभाग्यसुभगोदयतो भिन्नोऽभिन्नो वेति ग्रन्थावलोकनत एव ज्ञातुं शक्येत। आफ्रेख्टसूच्यां तत्कृतित्वेनोद्धृतानन्यान् ग्रन्थानधिकृत्य, तन्त्रसारकारेण कृष्णानन्देन अमृतानन्दस्य संबन्धं चोद्दिश्य श्रीगुरुचरणैः सर्वं प्रथमसंस्करणभूमिकायां प्रतिपादितम्। सरस्वतीभवनपुस्तकालयेऽमृतानन्दनाथविरचितस्याष्टाङ्गनिर्णयामृतचषकस्य मातृकाद्वयमुपलभ्यते। माधवानन्दनाथशिष्य एष अमृतानन्दोऽतीवार्वाचीन इति दीपिकाकारतो भिन्न एव।

समयः

वामकेश्वरीमत(नित्याषोडशिकार्णव)विवरणारम्भे जयरथेन—"पूर्वे श्रीदीपिकाचार्यप्रमुखा गुरवो मम"[1] इत्युक्तम्। अत्र दीपिकाचार्यपदेनामृतानन्दनाथ एवाभिप्रेतो ग्रन्थकारस्येति तत्रत्यभूमिकायामुक्तं ग्रन्थसम्पादकेन। 'अभिनवगुप्त'[2] इत्याख्ये आङ्ग्लभाषामये ग्रन्थे डॉ० कान्तिचन्द्रपाण्डेयमहोदयेन जयरथसमयः खीष्टद्वादशशताब्दधा अन्तिमो भागस्त्रयो-

१. वामकेश्वरीमतम्, पृ० १

२. द्रष्टव्यम्—पृ० २६२, द्वितीयं संस्करणम्।

In Public domain. Digitization Muthulakshmi Research Academy

दशशताब्द्या आद्यो भागश्च निर्धारितः, वामकेश्वरीमतविवरणभूमिकायां तु खीष्टद्वादशशताब्द्या आद्यो भाग इति। एष एव समयोऽमृतानन्दस्यापि संभाव्यते।

सौभाग्यविद्यासम्प्रदायः

अघोरशिवाचार्येण मृगेन्द्रवृत्तिदीपिकायां विद्यापादे—'हिरण्यगर्भ-कपिलमत्स्येन्द्रादयो वेदसांख्यकौलादितन्त्राणाम्" (पृ० ७४) इत्याचार्योक्त्या मत्स्येन्द्रनाथः कौलमार्गप्रवर्तकः प्रथम आचार्य इति प्रतिपादितम्। अभिनवगुप्ताचार्योऽपि तन्त्रालोकप्रथमाह्निकसप्तमपद्ये सकल-कुलशास्त्रावतारकतया प्रसिद्धं मच्छन्दविभुं स्तौति। अस्मिन् कौलदर्शन-सम्प्रदाये नाथनामान्ता अनेके आचार्याः समभूवन्। कौलसम्प्रदायत एव सौभाग्यविद्यासम्प्रदायः प्रववृते। अत्रत्याश्च आचार्या आनन्दनाथनामान्ता बहवः समभवन्। "....तेभ्योऽपि ललितामन्त्रा दशभेदविभेदिताः॥ तेषु द्वौ मनुराजौ तु वरिष्ठौ विन्ध्यमर्दन। लोपामुद्रा कामराज इति ख्याति-मुपागतौ॥ हादिस्तु लोपामुद्रा स्यात् कामराजस्तु कादिका॥" (ब्रह्माण्ड-पुराणे, ४।३८।८-१०) अत्र दशधा ललितामन्त्राः प्रतिपादिताः। ज्ञानार्णव-तन्त्रे तु द्वादशे पटले द्वादश विद्याः सूचिताः। ज्ञानार्णवस्य व्याख्यानात्मि-कायां पद्धतौ शङ्करानन्दनाथरचितसुन्दरीमहोदये इमा द्वादश विद्या उद्धृताः। तत्र लोपामुद्राभिधा हादिविद्या, कामराजोपासिता कादि-विद्या च प्रथिततमे। पुण्यानन्दनाथामृतानन्दनाथादयो हादिविद्यानुया-यिनः, भास्करारायस्तु कादिविद्यासम्प्रदायमनुसरति। बहुशाखा बहु-कालव्यापिनी चेयं सौभाग्यविद्यासम्प्रदायपरम्परा। सत्यवसरेऽत्र विषये विस्तरेण विचारः करिष्यते। तदैव भास्करारायेण प्रतिपादिता दार्शनिक-सिद्धान्ता अपि विवेचयिष्यन्त इत्यधुनैतावदेवोक्त्वा विरम्यते॥

—:०:—

In Public domain. Digitization Muthulakshmi Research Academy

चन्द्रस्थाने सूर्यं सूर्यस्थाने वायुना निरोद्धुं क्षमते, तदा चन्द्रसूर्यौ निरुद्धावमृतसेचनतदाहरणयोरशक्तौ। तदानीं वायुना प्रेरितेन स्वाधिष्ठानवह्निना शुष्कीभूतेऽमृतकुण्डे निराहारा कुण्डलिनी सुप्तोत्थिता सती सर्पवत् फूत्कारं कुर्वती [1]ग्रन्थित्रयं भित्वा सहस्रदलकमलमध्यवर्तिनं चन्द्रमण्डलं दशति। तस्माद् गलन्ती पीयूषधारा आज्ञाचक्रोपरिस्थितचन्द्रमण्डलमाप्लावयति। तस्माद् गलिताभिरमृतधाराभिः सर्वं देहमाप्लावयन्ति। ततश्चाज्ञाचक्रोपरिस्थितस्य चन्द्रमसः कलाः पञ्चदश नित्याः। ताः पञ्चदश तदधःस्थितविशुद्धिचक्रमाश्रित्य परिवर्तन्ते। सहस्रदलकमलान्तःस्थितचन्द्रमण्डलं बैन्दवस्थानम्। तत्कला चिन्मयी आनन्दरूप आत्मेति गीयते। सैव त्रिपुरसुन्दरी।

चन्द्रस्य प्रथमायाः कलायाः प्रतिपदिति नामधेयम्। सैव कलात्मिका सूर्यमण्डलान्निर्गता। कृष्णपक्षे तु सूर्यमण्डलं प्रविष्टा। एवं शुक्लपक्षे सूर्यमण्डलान्निर्गता द्वितीया कला द्वितीया तिथिः। कृष्णपक्षे तु सूर्यमण्डलं प्रविष्टा द्वितीया कला द्वितीया तिथिरिति। एव सर्वत्र ऊहनीयम्। अतश्च पञ्चदशकलाव्यवधानं सूर्यचन्द्रयोर्यत्र सा पौर्णमासी। पञ्चदश्यां कलायां सूर्यचन्द्रयोरत्यन्तसंयोगोऽतः सा अमावास्या। कौलमते चन्द्रकलात्मिकानां षोडशानां नित्यानां प्रतिदिनमेकस्या एवानुष्ठानम्। सर्वासां समयिमते। षोडश्याः कलायास्तु पञ्चदशस्वपि तिथिष्वनुष्ठानं सिद्धम्, पञ्चदशानां नित्यानां तत्रैवान्तर्भावात्। षोडशी कला नाम शकाररेफईकारबिन्द्वन्तो मन्त्रः। एतस्यैव बीजस्य नाम श्रीविद्येति। श्रीबीजात्मिका विद्या श्रीविद्येति।

त्रिविधः सम्प्रदायः

एतस्याः श्रीविद्यायाः सम्प्रदायः प्रक्रियाभेदेन त्रिविधः—कौलमतम्,

---

१. आधारस्वाधिष्ठानमणिपूरानाहतविशुद्ध्याज्ञाचक्रात्मकं श्रीचक्रं त्रिखण्डं सोमसूर्यानलात्मकम्। मूलाधारस्वाधिष्ठानचक्रद्वयमेकं खण्डम्। मणिपूरानाहतचक्रद्वयमेकं खण्डम्। विशुद्ध्याज्ञाचक्रद्वयमेकं खण्डम्। तत्र प्रथमखण्डोपरि अग्निस्थानम्। तदेव रुद्रग्रन्थिरित्युच्यते। द्वितीयखण्डोपरि सूर्यस्थानम्। तदेव विष्णुग्रन्थिरित्युच्यते। तृतीयखण्डोपरि चन्द्रस्थानम्। तदेव ब्रह्मग्रन्थिरित्युच्यते। एतदेव ग्रन्थित्रयम्।

In Public domain. Digitization Muthulakshmi Research Academy

मिश्रमतम्, समयिमतं चेति[1]। तत्र कौलानां चतुष्षष्ट्यागमा नित्याषोडशिकार्णवादौ प्रदर्शिताः। मिश्रमतानुयायिनामष्टौ आगमाश्चन्द्रकलाज्योत्स्नावतीप्रभृतयः। समयिनां तु शुभाश्रयपञ्चकम्। त्रिविधानामेषामागमानां विस्तरेण परिचयः—"चतुष्षष्ट्या तन्त्रैः" (१।३१) इति श्लोकस्य लक्ष्मीधरटीकायां द्रष्टव्यः। अयं शुभाश्रयपञ्चकनिरूपितो मार्गो वसिष्ठसनकशुकसनन्दनसनत्कुमारैः पञ्चभिर्मुनिभिः स्वस्वनाम्ना प्रसिद्धासु संहितासु प्रदर्शितः। अयमेव समयाचार इति व्यवह्रियते। इमाः संहिताः साम्प्रतं नोपलभ्यन्ते। [2]अम्बास्तवटीकायाम्—"श्रीशङ्कराचार्यकृतौ सौभाग्यविद्यासुभगोदयाख्यौ" इति दृश्यते। एतौ ग्रन्थौ तत्र नैकत्रोद्धृतौ। सुभगोदयस्तस्य व्याख्यानानि च बहुषु ग्रन्थेषूद्धृतानि सन्ति। ग्रन्थास्तु नोपलभ्यन्ते। गौडपादाचार्यकृता सुभगोदयस्तुतिर्भिन्न एव ग्रन्थः। शिवानन्दविरचिताया सुभगोदयवासनाया अपि नास्त्यनेन कोऽपि संबन्धः। अन्वेषणार्हं एष ग्रन्थः। सुभगोदयतद्व्याख्याने सौन्दर्यलहरीव्याख्याकर्तुर्लक्ष्मीधरस्य कृतौ लक्ष्मीधरायां नैकश उद्धृते। ललेन विरचिताऽपरा टीका सुभगोदयस्य भास्करायेण ललितासहस्रनामव्याख्यायां सौभाग्यभास्कराभिधायामुद्धृता। एवमादयो बहवो ग्रन्था अस्य सम्प्रदायस्य साम्प्रतं नोपलभ्यन्ते। शङ्कराचार्यपीठेष्वेते ग्रन्था अद्यापि सुरक्षिताः स्युरिति संभाव्यते। भाविनः शङ्कराचार्यमहोदया एतेषामुद्धारार्थं प्रार्थ्यन्ते।

साम्प्रतमुपलभ्यमानेषु समयिसम्प्रदायग्रन्थेषु गौडपादकृता सुभगोदयस्तुतिः शङ्कराचार्यकृता सौन्दर्यलहरी तस्या लक्ष्मीधराभिधा टीका च प्रथिततमाः। गौडपादकृतित्वविषये आद्यशङ्कराचार्यकृतित्वविषये च विवदन्ते ऐतिहासिकाः। तस्याश्चर्चाया नास्त्यत्रावसरः। श्रीमता अनन्तकृष्णशास्त्रिणा परिष्कृतस्य सौन्दर्यलहरीसंस्करणस्य भूमिकायामस्याः ३३ संख्याकानां टीकानामुपलब्धिरद्यावधि संजातेति सूचितम्। एताभ्यो भिन्नाया गौरीकान्तकृतायाष्टीकाया मातृका बटोदरस्थगायकवाडशोध-

---

१. "चतुष्षष्टिस्तन्त्राण्यपि कुलमतं निन्दितमभूद् यदेतन्मिश्राख्यं मतमपि भवेन्निन्दितमिह। शुभाख्याः पञ्चैताः श्रुतिसरणिसिद्धाः प्रकृतयो महाविद्यास्तासां भवति परमार्थो भगवती॥" इत्येवं गौडपादकृतायां सुभगोदयस्तुतौ संक्षेपेणैषां परिचयो दृश्यते।

२. सरस्वतीभवनपुस्तकालयस्थितायाः २१९२२ संख्याकाया मातृकायाः द्वितीये पत्रे।

In Public domain. Digitization Muthulakshmi Research Academy